# संस्कृत-वार्ता:

दिनाङ्क :- 13.10.2025 प्रात: - 06:55

## अथ वार्ताः

### भाजपा-सीईसी बैठक :

भारतीय-जनता-पार्टीति दलस्य केन्द्रीय-निर्वाचन-समितेः संगोष्ठी नवदिल्लीनगरे दलमुख्यालये गतरात्रौ अभवत्। प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीय गृहमन्त्री अमितशाहः, रक्षामन्त्री राजनाथसिंहः, भाजपा-राष्ट्राध्यक्षः जेपी नड्डा, दलस्य वरिष्ठनेतारश्च उपस्थिताः आसन्, यस्याः संगोष्ठ्याः उद्देश्यं बिहारविधानसभानिर्वाचनार्थं दलस्य रणनीतिं, प्रत्याशीसूचीं च अन्तिमरूपेण निर्धारयितुम् आसीत्। बिहारनिर्वाचनस्य कृते एनडीए-दलस्य आसन-सहभाग-सूत्रस्य घोषणायाः अनन्तरम् भाजपादलस्य केन्द्रीय-निर्वाचन-समितेः संगोष्ठी आयोजितासीत्। सत्ताधारी एनडीए इत्यनेन ह्यः एव बिहारविधानसभानिर्वाचनार्थं स्वस्य आसन-सहभाग-सूत्रस्य घोषणा कृता। एतदनुसारं बिजेपि तथा जेडीयु दले परस्परं एकोत्तर-एकशतम् आसनेषु प्रतिस्पर्धां करिष्यतः, लोकजनशक्ति इति दलम् ऊनत्रिंशत् आसनेषु प्रतिस्पर्धां करिष्यति। राष्ट्रीय लोकमोर्चा तथा हिन्दुस्तानी आवाम मोर्चा इति दले क्रमेण षट्-षट् आसनेषु प्रतिस्पर्धां करिष्यतः। एनडीए-घटबन्धनस्य प्रतिस्पर्धा, विपक्षस्य इन्डी-घटबन्धनेन भविष्यति, यस्मिन् तेजस्वी यादवस्य नेतृत्वे राष्ट्रीयजनतादलम् (राजद), काङ्ग्रेस-पक्षः, राष्ट्रीय-कम्यूनिस्ट्-पार्टीत्यादीनि दलानि च सन्ति। बिहारविधानसभानिर्वाचनं नवम्बर् मासस्य षडेकादश दिनाङ्कयोः च द्वयोः चरणयोः भविष्यति । मतदानस्य गणना नवम्बर् चतुदर्श दिनाङ्के निर्धारिता अस्ति।

### प्रधानमंत्री-बिहार:

प्रधानमन्त्री तथा भाजपा वरिष्ठ नेता श्रीनरेन्द्र-मोदी बुधवासरे बिहारस्य स्वस्य बूथ-स्तरीय-दल-कार्यकर्तृभिः सह वार्तां करिष्यति। सामाजिक-माध्यम-सन्देशे श्रीमोदी दलस्य कार्यकर्तृभ्यः मेरा-बूथ सबसे-मजबूत इत्यस्मिन् अभियाने सम्मिलितुं स्वपरामर्शं च दातुम् अनुरोधं कृतवान्। प्रधानमन्त्रिणा इदमपि उक्तं यत् सः केषाञ्चन चयनितकार्यकर्तृभिः सह तेषां परामर्शेषु प्रत्यक्षतया संवादं करिष्यति।

### अमितशाह-जयपुर

केन्द्रीयगृहमन्त्री अमितशाहः अद्य आदिवसं राजस्थानस्य भ्रमणार्थं जयपुरम् आगमिष्यति। स्वस्य भ्रमणकाले सः नूतनानां आपराधिकविधीनां-भारतीयन्यायसंहिता, भारतीयनागरिकसुरक्षासंहिता, भारतीयसाक्ष्य-अधिनियमानां च कार्यान्वयनस्य एकवर्षपूर्तौ, आयोजितस्य राज्यस्तरीयप्रदर्शनस्य उद्घाटनं करिष्यति। जयपुरनगरे अद्यारभ्य अष्टादश-दिनाङ्कपर्यन्तं आयोजिते षड्-दिवसीय-प्रदर्शने नूतन-विधीनां प्रमुख-प्रावधानानाम् प्रकाशनं भविष्यति, सम्पूर्णे राजस्थाने तेषां कार्यान्वयनस्य प्रगतिः च प्रदर्शिता भविष्यति। प्रदर्शन्याः उद्घाटनानन्तरं श्री-शाहः जनसभामपि सम्बोधयिष्यति। अस्मिन् अवसरे सः विंशति-शताब्दस्य चतुर्विंशतितमवर्षस्य उदयमानराजस्थान-वैश्विक-निवेश-शिखरसम्मेलनस्य अन्तर्गतं प्राप्तानां चतुर्लक्षकोटिरूप्यकाणां एमओयूनां भूमिपूजनसमारोहे अपि भागं गृहीष्यति। तदतिरिक्तं सः त्रिशतोत्तर-नवसहस्र-कोटिरूप्यकाणां अधिकमूल्यानां विविधविकासपरियोजनानां उद्घाटनं, आधारशिलास्थापनं च करिष्यति ।

### गाजा-शान्ति-शिखरसम् :

गाजा-युद्धस्य समाप्त्यर्थं शान्ति-सन्धेः अन्तिमरूपेण निर्धारणं लक्ष्यीकृत्य अन्तर्राष्ट्रीय-सम्मेलनम् अद्य मिस्रस्य शर्म-एल-शेख-इत्यस्य रेड्-सी-रेसोर्ट्-सिटि मध्ये भविष्यति। मिस्रदेशस्य राष्ट्रपतिः अब्देल् फत्ताह अल-सीसी, अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः च अस्य समागमस्य सह-अध्यक्षतां करिष्यतः। यस्मिन् विंशति-तः अधिकेभ्यः देशेभ्यः नेतारः आगमिष्यन्ति इति अपेक्षा अस्ति। अस्मिन् सम्मेलने संयुक्तराष्ट्रसङ्घस्य महासचिवः एण्टोनियो गुटेरेस् अपि उपस्थितः भवितुम् अर्हति।

शिखरसम्मेलने गाजापट्ट्यां शत्रुतायाः समाप्तिः, क्षेत्रीयशान्तिप्रयासानां उन्नतिः, सम्पूर्णे पश्चिमे एशियायां सुरक्षायाः स्थिरतायाः च नूतनचरणस्य आरम्भः च इति विषयेषु चर्चा भविष्यति। गाजाशान्तिशिखरसम्मेलने केन्द्रीय-पर्यावरण-वन-जलवायु-परिवर्तन-राज्यमन्त्री कीर्तिवर्धनसिंहः भारतस्य प्रतिनिधित्वं करिष्यति। सामाजिक-माध्यम-सन्देशे केन्द्रीयमन्त्री प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य विशेषप्रतिनिधिरूपेण गाजाशान्तिशिखरसम्मेलने भागं ग्रहीतुं कैरोनगरे आगमनं सूचितवान्। प्रधानमन्त्री नरेन्द्रमोदी गुरुवासरे इजरायल-हमास-इत्यनयोः मध्ये शान्तियोजनायाः प्रथमचरणस्य सन्धेः स्वागतं कृतवान्।

**<u>अफगानिस्तान-एफ.एम.</u>**

अफगानिस्तानस्य विदेशमन्त्री अमीरखान-मुत्तकी पाकिस्तानं प्रत्यादिष्टवान् यत् यदि इस्लामाबादः सुसम्बन्धं शान्तिं च न इच्छति तर्हि काबुलस्य पार्श्वे अन्यविकल्पाः सन्ति। अफगानिस्तानस्य विदेशमन्त्री दिल्लीनगरे वार्ताहर-सम्मेलने द्वयोः देशयोः मध्ये प्रचलित-संघर्षस्य विषये वदन्, अफगानिस्तानम्, स्वस्य सार्वभौमत्वस्य रक्षणं निरन्तरं करिष्यति इति अवदत्।

**<u>टेस्ट क्रिकेट्-भारत-वेस्टइंडिज़</u>**

टेस्ट् क्रिकेट्-क्रीडायां वेस्ट्इण्डीज-दलम् अद्य प्रातः दिल्ली-नगरस्य अरुण-जेटली-क्रीडाङ्गणे स्तोभक-द्वय-हानौ त्रिसप्तत्युत्तर-एकशतं धावनांकेभ्यः अग्रे द्वितीयपारीं पुनः प्रारप्स्यते। इयं क्रीडास्पर्धा प्रातः सार्धनववादने आरभ्यते।

**।।इति वार्ताः।।**